सम्पादकः - मलयपोडे

आलङ्कारिकाः - शुभदीपपालः, तथागतमण्डलः

## सूचीपत्रम्


| | |
|---|---|
| गुरवो मे चतुर्विंशतिः | सुकान्त-मान्ना |
| भगवत्सखा सुदामा | विष्णुपद-पालः |
| लीलार्णवः | आबीरलाल-गङ्गोपाध्यायः |
| ध्रुवोपाख्यानम् | पङ्कज-राउलः |
| विष्णुभक्तः प्रह्लादः | मलय-माइतिः |

## गुरवो मे चतुर्विंशतिः

## सुकान्त-मान्ना, समन्वित-एम्-ए-कक्षायां पञ्चमवर्षीयः

यदुवंशस्य प्रथमो राजा आसीद् यदुः। स एकदा एकम् अवधूतं दृष्टवान्। अवधूतो नाम अतिवर्णाश्रमी आत्मस्थः योगी। सः अवधूतः प्रसन्नवदन आसीत्। तं यदुः पृष्टवान्- "हे देव, भवतः अर्थोपार्जनं नास्ति। तथापि भवान् सानन्दं विचरति। भवतः आनन्दस्य कारणं किम्" इति। तदा अवधूतः प्रोवाच- "हे राजन्, मया यद् ज्ञानं गुरुभ्यः प्राप्तं तदेवानन्दस्य हेतुः। एको न गुरवो मे चतुर्विंशतिः। तेभ्यो यद् ज्ञानं प्राप्तं तत्कथयामि।

**१) पृथिवी-** पृथिवी मे प्रथमो गुरुः। अस्माभिरनेकधा उत्पीडितापि सा अविचला। तस्मात् ज्ञातं स्वकर्तव्ये स्थिरो भवितव्यः। किञ्च, पृथिव्याः पर्वतवृक्षादीनां मनुष्यप्रयोजने नाशेऽपि पृथिवी न विरोधमाचरति । तेन ज्ञातं परोपकाराय मे जीवनम्।

**२) वायुः-** वायुः मेऽपरो गुरुः। सः अलिप्तः सन् गन्धं वहति। तस्मात् ज्ञातं यत् संसारेऽस्मिन् अनासक्ततया स्वकर्तव्यं पालनीयम्।

**३) गगनम्-** अपरः गुरुः गगनम्। गगनं यथा गृहाभ्यन्तरे तथा बहिरपि विद्यमानम्। तद् एकया दृष्ट्या सान्तम् अन्यया च अनन्तम्। तस्मात् ज्ञातं यद् देहस्य परिमितत्वेऽपि आत्मा अमितः अनन्तः।

**४) जलम्-** जलं मेऽपरो गुरुः। जलं मलिनं वस्तु शुद्धं विदधाति परन्तु स्वयं निर्मलं स्निग्धञ्च तिष्ठति। तस्मात् ज्ञातं यत् स्वयं पवित्रः शान्तश्च सन् जगतः मालिन्यदूरीकरणे रतो भवितव्यः।

**५) अग्निः-** अपरः गुरुर्मे अग्निः। काष्ठादिषु गुप्ततया स्थितः स दाहकाले प्रकाशितः सन् सर्वान् कलुषान् दाहयति, परन्तु स्वयम् अकलुषितस्तिष्ठति। एवं भगवान् सर्वत्र विराजमानः, परन्तु तपसा स ज्ञातव्यः।

**६) चन्द्रः-** अपरः चन्द्रः। चन्द्रकलायाः ह्रासो वृद्धिश्च भवति न तु

चन्द्रस्य। तस्मात् ज्ञातं यद् आजन्मनः मृत्युपर्यन्तम् अस्माकं शरीरस्य ह्रासवृद्धी भवतः न तु आत्मनः।

**७) सूर्यः-** अपरः गुरुः सूर्यः। विभिन्ने जलपात्रे सूर्यः भिन्नः भिन्नः इति प्रतिभाति, परन्तु स एक एव। एवं विभिन्ने देहे सत्यपि आत्मा एक एव।

**८) कपोतदम्पती-** कपोतः अपरो गुरुः। कस्मिंश्चिद् वृक्षे कपोतदम्पती स्वशावकैः सह सुखेन वसतः स्म। कदाचित् तयोः अनुपस्थितौ शावकाः व्याधजाले बद्धाः। कपोती अपि दुःखेन जालं गता तत्र बद्धा। कपोतः अपि दुःखेन स्वयमेव जाले बद्धः। कपोताद् ज्ञातं यद् वयमेव स्वेच्छया स्वबन्धनस्य कारणं यदि न स्याम तर्हि अस्मिन् जन्मनि एव मोक्षः सम्भवति।

**९) अजगरः-** अजगरः अपरः गुरुः। तेन यत्प्राप्यते तदेव भुज्यते, न प्राप्यते चेद् धैर्येण अपेक्ष्यते। तस्मात् ज्ञातं यद् बुद्धिमान् सुखभोगादिप्राप्तिलोभं न विदधाति, अपि तु स यदृच्छालाभसन्तुष्टो भवति।

**१०) समुद्रः-** अन्यो गुरुः समुद्रः। समुद्रो वृष्ट्या स्फीतः ग्रीष्मे शुष्को वा न भवति। तथैव भगवद्भक्तो दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहो भवति।

**११) पतङ्गः-** पतङ्गः अपरः गुरुः। यथा प्रदीप्तमग्निं दृष्ट्वा मुग्धः पतङ्गः विनाशं लभन्ते तथा मुर्खोऽपि रूपमोहासक्तः विनाशं प्राप्नोति।

**१२) मधुकरः-** मधुकरः अपरो गुरुः। तेन सञ्चितं मधु अपरैः भुज्यते। तस्मात् ज्ञातं यत् यतिना कदापि सञ्चयः न करणीयः।

**१३) करिणी-** करिणी अन्यः गुरुः। करिणीमोहेन तृणादिभिः आच्छादिते गर्ते करी पतितः सन् व्याधैः बद्धो भवति। तस्मात् ज्ञातं यत्सन्यासी काष्ठनिर्मितमपि स्त्रीमूर्तिं न स्पृशेत्, तेन तस्य संसारबन्धनाशङ्का भवेत्।

**१४) भ्रमरः-** अपरः गुरुः भ्रमरः। भ्रमरः सर्वस्मात् पुष्पात् मधु सङ्गृह्णाति। तस्माद् ज्ञातं यत् प्राज्ञेन सर्वस्मात् शास्त्रात् सारः ग्रहणीयः।

**१५) मृगः-** मम गुरुः मृगः। व्याधसङ्गीतेन आकृष्टो मृगः व्याधजाले पतति। अतः साधकः कदापि नृत्यगीतादिषु आकृष्टो न स्यात्।

१६) **मत्स्यः-** अन्यो गुरुः मत्स्यः। मत्स्यात् शिक्षितं यद् रसनेन्द्रियजयः अस्माभिरवश्यं करणीयः। मत्स्यो यथा आहारलोभेन मुग्धः धीवरेण बद्धः सन् मृत्युं लभते तथैव मूढो रसनेन्द्रियसक्तो विनाशं याति।

१७) **पिङ्गला-** ममापरो गुरुः पिङ्गलानामिका गणिका। तस्याः सकाशाद् ज्ञातं यत् आशा एव सर्वानर्थमूलम्, तस्याः त्यागे एव परमं सुखम्'।

१८) **काकः-** अपरो गुरुः काकः। काकेन यदा मत्स्यादिकं भोज्यं नीयते तदा अन्ये पक्षिणः तस्योपरि आक्रमणं करोति। यदा काकः तं भोज्यं त्यजति, तदा स आक्रमणात् मुक्तो भवति। तेन ज्ञातम् आसक्तित्याग एव श्रेयान्। तेनैव सुखम्।

१९) **बालकः-** अन्यो गुरुः बालकः। बालकस्य नास्ति मानापमानज्ञानम्। स स्वक्रीडायामेव मत्तः। तस्मात् ज्ञातं यद् आत्मनि एव सन्तुष्टः स्थातव्यः।

२०) **कुमारी-** अपरो मे गुरुः कुमारी। कस्याश्चित् कुमार्याः हस्तौ कङ्कणपूर्णौ आस्ताम्। तस्मात् सा निश्शब्दं कार्यकरणे असमर्था। तस्मात् सा एकं विहाय सर्वाण्यपि कङ्कणानि त्यक्तवती। तस्मात् ज्ञातं यद् भगवदाराधनाय एकाकी एव स्थातव्यः। अन्यथा तु विघ्नो भवत्येव।

२१) **शबरः-** शबरो मे अपरो गुरुः। स एकाग्रेण मनसा शरं निर्माति। पार्श्वे कोलाहलादिकं भवति चेदपि तस्य दृष्टिः शरनिर्माणाद् विच्युता न भवति। तस्मात् ज्ञातं यत् चञ्चलं मनः प्राणायामादिना एकाग्रं करणीयम्।

२२) **सर्पः-** मम गुरुः सर्पः। सर्पस्य स्वीयं गृहं नास्ति। स सर्वत्र सुखेन विचरति। तस्मात् ज्ञातं यत् गृहशून्यता एव सुखम्, गृहं (बन्धनं) दुःखस्य कारणम्।

२३) **लूता-** ममापरो गुरुः लूता। लूता स्वदेहात् मुखेन जालं निर्माति। पुनः स्वमुखे एव जालं संगृह्णाति। तस्माद् अवबुद्धं यद् ईश्वर एव जगत्स्रष्टा जगद्धर्ता च।

**२४) काचकीटः-** मम गुरुः काचकीटः। केचन कीटाः अन्यान् कीटान् स्वगर्तें स्थापयन्ति। तदा ते कीटा भयेन पूर्वकीटस्वरूपं प्राप्नुवन्ति। ते एव काचकीटाः। तेभ्यः अवगतं यत् तन्मयभावेन भगवतः ध्यानं क्रियते चेत् तत्स्वरूपं लभ्यते।

एवम् अवधूतस्य चतुर्विंशतिगुरुवृत्तान्तश्रवणेन यदुराजस्य संसारमोहः छिन्नः। ततः सः अनासक्तः सन् भगवदाराधने रतः।

# भगवत्सखा सुदामा

## विष्णुपद-पालः, समन्वित-एम्-ए-कक्षायां पञ्चमवर्षीयः

सुदामा भगवतः श्रीकृष्णस्य सहपाठी प्रियसखा आसीत्। तौ गुरुकुले सान्दीपनिमुनेः शास्त्राध्ययनं कृतवन्तौ। सुदामा सज्जनः सत्यपरायणः ब्राह्मण आसीत्। परन्तु सः अतीव दरिद्रः। तस्य समीपे भोजनाय धनमपि नासीत्। तस्य स्त्री पतिपरायणा ब्राह्मणी छिन्नवस्त्रं धारयति स्म। ब्राह्मणः ब्राह्मणी च प्रायः अभुक्त्वैव दिवसं यापयति स्म।

एकस्मिन् दिने सुदाम्नः पत्नी तमकथयत्- "द्वारकाधीशः श्रीकृष्णः तव सखा अस्ति खलु। त्वं तं प्रतिं गच्छ। बन्धोः तव दुरवस्था वीक्ष्य अवश्यं स तन्निवृत्त्युपायं कल्पयिष्यति। सः अवश्यमेव धनरत्नादिकं तुभ्यं दास्यति" इति। धने अनासक्तेन ब्राह्मणेन चिन्तितं यद् गच्छामि चेत् श्रीकृष्णस्य दर्शनं तु लप्स्यते। तस्य दर्शनमेव मम परमलाभः। ततो ब्राह्मणः सुदामा स्वभार्यायै मित्रस्य उपहारत्वेन किञ्चन वस्तु प्रार्थयामास। ब्राह्मणी श्रीकृष्णस्य उपहारत्वेन मुष्टिचतुष्टयपरिमितं पृथुकं ब्राह्मणाय प्रदत्तवती।

श्रीकृष्णः द्वारकायाः विराटपुर्यां निवसति स्म। राजपुरीं परितः सैन्या विद्यमानाः। मलिनवस्त्रधारी ब्राह्मणः सुदामा अन्तःपुरं प्रविश्य दृष्टवान् यत् शय्यायां श्रीकृष्णः शयानः अस्ति। तत्र रुक्मिणी श्रीकृष्णस्य सेवने रता। श्रीकृष्णः मित्रं प्रेक्ष्य आनन्देन तमालिङ्गितवान्। ततः तस्य कुशलवार्तामपृच्छत्। ततः परं तस्य शुश्रुषां चकार। मलिनवस्त्रधारिणः दरिद्रब्राह्मणस्य एतावत्सम्माननम् इति वीक्ष्य सर्वे अन्तःपुरस्था विस्मिताः।

ततः मित्रद्वयेन गुरुगृहवासकालस्य स्मृतिमन्थनं वार्तालापेन विहितम्। श्रीकृष्णः सुदामानं पृष्टवान्- "हे सखा, मम कृते त्वया किमानीतं दर्शय।" इति। तदा सुदामा चिन्तितवान् क्व द्वारकायाः अधिपतिः क्व च मे दरिद्रस्य उपहाररूपं पृथुकम्। अतः स पृथुकं गोपयितुमिष्टवान्। परन्तु श्रीकृष्णः बलात् पृथुकं

स्वीकृतवान्। तत एकमुष्टिपरिमितं पृथुकं भुक्त्वा सानन्दं परितृप्तः सन् प्रोवाच त्वया प्रेम्णा आनीतमिदम् अमृतम्।

भगवते हि प्रेम्णा भक्त्या वा यत्किञ्चिद्वस्तु दीयते स सादरं तत् स्वीकरोति। श्रीमद्भगवद्गीतायां भगवान् प्राह-

पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति।
तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः ॥इति

एवं पृथुकभक्षणेन श्रीकृष्णः परितृप्तः सञ्जातः। भगवान् तु सर्वज्ञः। अतः स ज्ञातवान् यद् अयं ब्राह्मणः स्वयं धनरत्नादिषु अनासक्तः भगवद्भक्तिपरायणः, परन्तु पत्न्याः इच्छापूरणायैव मामुपागत इति। अहम् अस्मै दुर्लभं धनरत्नादिकं दास्यामीति भगवान् निश्चितवान्। परन्तु भगवान् साक्षात् सुदामानं किमपि नोक्तवान्। सुदामापि श्रीकृष्णं किमपि नोक्तवान्। स चिन्तितवान् बहुभ्यः दिनेभ्यः परं मित्रेण सह साक्षात्कारः सञ्जातः, अयमेव मे परमलाभ इति। स रात्रौ राजपुर्याम् आतिथ्यं स्वीकृत्य प्रातः गृहं प्रति प्रस्थितः।

परन्तु तेन गृहं न लब्धम्। गृहस्य स्थाने तेन महद् भवनं, महान् सरोवरः उद्यानमित्यादिकं दृष्टम्। ततः नानाविधालङ्कारमण्डितां स्वपत्नीं दृष्टवान्। श्रीकृष्णमाहात्म्यज्ञः सः अवगतवान् यत् सर्वं गोविन्दस्य कृपा इति। अनासक्तः सुदामा प्राप्तं धनरत्नादिकं परोपकाराय व्ययीकृत्य अन्तकाले भगवत्सान्निध्यं लेभे।

# लीलार्णवः

आबीरलाल-गङ्गोपाध्यायः, समन्वित-एम्-ए-कक्षायां तृतीयवर्षीयः

स्थगयित्वा महेन्द्रस्य पूजनं गोकूले भवान्।
प्रारेभे गिरेः पूजा गोवर्धनस्य हे प्रभो॥१।
घनदलमण्डितगोकुलमीक्ष्य गोवर्धनमयि धृतवान् नाथ।
अथ सुरपतिरागम्य ननाम त्वामयि सुरनरमणिगणनाथ॥२।
श्रावणघनगणराजितगगनं राधा पश्यति भवतो मार्गम्।
याहि दीनबन्धो याहि त्वं नोचेद् दीना श्लिष्यति मरणम्॥३।
नित्यं यमुनापुलिनविहारिन् सुमधुरसुरयुतवंशीधारिन्।
कोटिभानुनिन्दितमणिधारिन् गोपीमानसनित्यविहारिन्॥४।
हे लीलार्णव हे गिरिधारिन् हे भवसुन्दर कौस्तुभधारिन्।
कम्बुकण्ठधर हे जगदीश्वर नमोऽस्तु हे जगदुद्धारिन्॥५।

# ध्रुवोपाख्यानम्

## पङ्कज-राउलः, समन्वित-एम्-ए-कक्षायां तृतीवर्षीयः

सृष्टिकर्ता ब्रह्मा एकदा नूतनं रूपं धृतवान्। क्रमशः तत् नूतनं शरीरं भागद्वयेन विभक्तम्। एको भागः पुरुषः, अपरश्च भागः स्त्री। पुरुषो हि मनुः स्त्री च तत्पत्नी शतरूपा। अनयोर्हि द्वौ पुत्रौ समुत्पन्नौ उत्तानपादः प्रियव्रतश्चेति।

राज्ञ उत्तानपादस्य महिषीद्वयं सुरुचिः सुनीतिश्चेति। सुरुचेः पुत्र उत्तमः सुनीतेः पुत्रश्च ध्रुवः। राजा सुरुचौ गाढतया अनुरक्त आसीत्, अतस्तस्य पुत्रम् उत्तममाधिक्येन प्रीणाति स्म। राजसिंहासने उपविशन् राजा उत्तमं स्वक्रोडे धारयति स्म। एकदा राजसिंहासने उपविष्टस्य राज्ञः क्रोडे ध्रुव उपवेष्टुम् इष्टवान्। तदा सुरुचिः तमुद्दिश्य उक्तवती- "ध्रुव, त्वं सुनीतेः आत्मजः। अतो नास्ति ते राजसिंहासने अधिकारः। श्रीहरेः तपस्यां कुरु। यदि परस्मिन् जन्मनि मे पुत्रो भविष्यसि तर्हि राजसिंहासने उपवेशनाधिकारं प्राप्स्यसि" इति।

विमात्रा तिरस्कृतो बालको ध्रुवः क्रन्दन् स्वमातरम् उपयातः। माता सर्वं ज्ञात्वा पुत्रं स्वक्रोडे स्वीकृत्य उक्तवती- "पुत्र, अन्यम् अपराधित्वेन मा चिन्तय। यः अन्यस्मै दुःखं ददाति स स्वयमपि दुःखं प्राप्नोति। तव विमाता कटुभाषणस्य स्वयमेव दण्डं प्राप्स्यति। अहं नास्मि राज्ञः प्रिया, अतो राजानं प्रति एतद्विषये वचनं मे तु निष्फलमेव। विमातुर्वचनानुसारेण त्वं श्रीहरेः भजनं कुरु। श्रीहरेः आराधनं विना राजसिंहासनलाभस्य नास्त्यन्य उपायः। यस्य पादपद्मं सम्पूज्य ब्रह्मणा ब्रह्मपदं लब्धम्, यो हि मुनिभिः वन्द्यः, तस्मै श्रीहरये स्वाभिलाषं निवेदय। श्रीहरिरेव तव दुःखं निवारयिष्यति" इति।

बालको ध्रुवो मातृवचसि श्रद्दधानः राजपुरीं त्यक्त्वा श्रीहरेः अन्वेषणाय वनमार्गं प्रति प्रस्थितः। कुत्रास्ति श्रीहरिः। मार्गे देवर्षिणा नारदेन तस्य साक्षात्कारो जातः। यत्रैव भगवतो भक्तस्तत्रैव नारदः। नारदः ध्रुवात् सर्वं वृत्तान्तमवगम्य तं परीक्षितुं प्रोवाच- "त्वं बालकः। त्वं न तपसि समर्थः। तपः कष्टसाध्यम्। भगवतः

प्राप्तिस्तु ततोऽपि क्लेशास्पदम्। अतस्त्वं गृहं प्रत्यागच्छ।" इति। तदा ध्रुव उक्तवान्- "विमात्रा अपमानितः अहम्। मम मनः चञ्चलं हृदयञ्चाशान्तम्। मम अशान्ते हृदये नास्त्यस्य प्रस्तावस्य स्थानम्। भवान् तु हिरण्यगर्भसम्भवः। हे देव, मम पूर्वपुरुषैः अप्राप्तस्य श्रीहरेरभयपदस्य लाभे मे मार्गं निर्दिशतु।" इति। परीक्षां समुत्तीर्णे ध्रुवे नारदो नितरां सन्तुष्टः। ततः स ध्रुवाय मार्गनिर्देशं विधाय ततः प्रस्थितः।

ततः ध्रुवो भगवतो नित्यस्थितिप्रदेशं यमुनातीरं सम्प्राप्य 'ओं नमो भगवते वासुदेवाय' इति मन्त्रोच्चारणेन श्रीहरेस्तपस्यां प्रारब्धवान्। तस्य कठोरतपसा प्रसन्नः श्रीहरिः आविर्भूतः। यस्य मायया सम्मोहितमिदं जगत्, तस्य भगवतो विष्णोर्दर्शनं प्राप्य ध्रुव आनन्दसागरे निमग्नः। स भगवतः स्तुतिं कुर्वन् आत्मानं भगवच्चरणयोः समर्पितवान्। ध्रुवस्य कठोरतपसा भक्त्या च सन्तुष्टः नारायणः तस्मै वरं प्रददौ। भगवत्प्रसादात् तेन राजसिंहासनं प्राप्तम्। राजसिंहासनमारूढो ध्रुवो बहूनि वर्षाणि राज्यशासनम् अकरोत्। किञ्च, अन्तकाले भगवन्तं स्मरन् स्वर्गलोकं प्रस्थितः। भगवतः श्रीहरेः आशीर्वादात् स्वर्गलोको हि ध्रुवलोकरूपेण प्रसिद्धः।

## विष्णुभक्तः प्रह्लादः

### मलय-माइतिः, समन्वित-एम्-ए-कक्षायां तृतीवर्षीयः

पुरा हिरण्याक्षहिरण्यकशिपुनामकौ असुरौ भ्रातरौ आस्ताम्। भगवान् वराहरूपमवलम्ब्य हिरण्याक्षं जघान। अतः प्रतिहिंसापरायणः हिरण्यकशिपुः कठोरं तप आचचार। तस्य तपसा तुष्टः प्रजापतिस्तस्मै वरं प्राददात् यत् केनापि सुरेण असुरेण नरेण पशुना वा भूमौ आकाशे वा तं हन्तुं न शक्ष्यते। वरं प्राप्य दैत्याधिपतिः हिरण्यकशिपुः स्वर्गं बलाद् अधिचकार। देवाः तस्यात्याचारपीडिताः जगत्पालयितुः भगवतो विष्णोः शरणं जग्मुः विष्णुश्च तान् आश्वासयामास।

दैत्याधिपस्य हिरण्यकशिपोः पुत्रचतुष्टयमासीत्, तेषु प्रह्लादः कनिष्ठः। तस्य स्वभावः शान्तः। तस्य कलह-युद्धादिषु नासीदाग्रहः। स सर्वदा भगवच्चिन्तने मग्नः। तस्य प्रह्लादस्य गुरुरूपेण हिरण्यकशिपुना षण्डामर्कनामकौ राजपुरोहितौ नियुक्तौ। केभ्यश्चिद् दिवसेभ्यः परं स्वपुत्रं क्रोडे स्वीकृत्य राज्ञा पृष्टम्- "हे पुत्र, किमधीतं त्वया, किञ्चित्कथय" इति। तदा प्रह्लादः प्रोवाच- "अहं ममेति मिथ्याबुद्धिरेव उद्वेगकारिका। तेनैवात्मनः अधःपातः सिध्यति। अधःपातात् समुद्धाराय श्रीहरेः आश्रयः स्वीकार्यं इति मे धीः।" इति। राजा किञ्चिद् हसितवान्, परन्तु गुरू आहूय आदिष्टवान् यद् भगवद्विषयकभक्त्यादेः उपदेशं कदापि कोऽपि प्रह्लादाय यथा न दद्यात्। षण्डामर्कावपि सावधानं प्रह्लादाय उपदेशप्रदाने रतौ आस्ताम्। ततः गतेषु केषुचिद् दिवसेषु राज्ञा पुनः प्रह्लादः पृष्टः। तदा प्रह्लाद उक्तवान्-

"श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम्।<br>
अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम्॥<br>
इति पुंसार्पिता विष्णौ भक्तिश्चेन्नवलक्षणा।<br>
क्रियेत भगवत्यद्धा तन्मध्येऽधीतमुत्तमम्॥" इति।

एतच्छ्रुत्वा क्रोधान्वितः हिरण्यकशिपुः अङ्कस्थं स्वपुत्रं भूमौ निक्षिप्य तं

हन्तुमादिदेश। दैत्याः प्रह्लादं शूले आरोपयामासुः। पुनः अस्त्रेण तस्मिन् आघातं व्यदधुः। परन्तु हरौ समाहितचित्तः प्रह्लादः सर्वम् असहत। पुनस्तं ते सर्पस्य उन्मत्तस्य हस्तिनः सम्मुखे स्थापयामासुः। दैत्याः प्रह्लादस्य वधाय बहुधा प्रयत्नं कृतवन्तः परन्तु केनापि प्रकारेण तस्य वधो न सम्पन्नः। हरौ समाहितचित्तस्य बालस्य प्रह्लादस्य हरिकृपया विपत्सागरात् समुद्धारः संवृत्तः।

एतद्दर्शनेन दैत्याधिपस्य हिरण्यकशिपोः महती चिन्ता संवृत्ता यद् क्षुद्रः बालकोऽयं कथं शक्तिमान् सम्पन्नः। स पुनः प्रह्लादं गुरुगृहं प्रेषयामास। गुरुगृहे सः अन्यान् बालकान् सर्वदा भगवद्विषयिणीं कथामेव श्रावयति स्म। प्रह्लादो यदा मातृगर्भे आसीत्तदा एव नारदात् श्रीहरिभक्तिविषयकं ज्ञानं प्राप्नोत्। एवं स आसीद् जन्मतो ज्ञानी। स स्वबन्धून् उपदिदेश- "गुरुसेवा गुरुभक्तिः साधुसङ्गः ईश्वराराधनम्, ईश्वरविषये श्रद्धा इत्यादिकं श्रीहरिलाभे सोपानम्। भगवान् श्रीहरिः सर्वभूते स्थितः" इति। एवं क्रमशो गुरुगृहे दैत्यबालका अपि विष्णुभक्ताः सम्पन्नाः।

एतत्सर्वं श्रुत्वा हिरण्यकशिपुः क्रुद्धः सन् प्रह्लादं प्रोवाच- "दुष्ट बालक, मम प्रतापाद् देवा दानवाश्च भीताः। एतावत् सामर्थ्यं कुतः प्राप्तं यद् ममावमाननं करोषि" इति। तदा प्रह्लादः- "न केवलं मे सामर्थ्यस्य, अपि तु भवतः सामर्थ्यस्यापि नारायण आश्रयः। अतः तस्मिन् शत्रुतां त्यजतु।...." इत्यादिकं प्रोवाच। तच्छ्रुत्वा क्रोधोन्मत्तः हिरण्यकिपुः खड्गम् उत्तोल्य उक्तवान्- "यदि ते ईश्वरः सर्वत्रास्ति, तर्हि अस्मिन् स्तम्भेऽपि स्यात्। यदि न स्याच्चेत् ते मस्तकं खड्गेन छिनद्मि" इति। एवमुक्त्वा स मुष्ट्याघातेन स्तम्भं बिभेद। सहसा स्तम्भं भित्त्वा भगवान् श्रीहरिः प्रादुर्भूतः। परन्तु तस्य रूपं हि किञ्चिद्भिन्नम्। तस्य मस्तकं सिंहस्य देहश्च मनुष्यस्य। हिरण्यकशिपोः नाशाय भगवान् श्रीहरिः नरसिंहरूपेण अवतीर्णः। भगवतो नरसिंहस्याक्रमणेन हिरण्यकशिपुः हतसामर्थ्यः सम्पन्नः। नरसिंहः हिरण्यकशिपुं बलात् स्वाङ्के स्वीकृत्य नखैः तस्य शरीरम् अछिनत्। ततः प्रह्लादाय स जगन्मोहनरूपं दर्शयामास। भगवत्स्पर्शेन तस्य आत्मज्ञानं संवृत्तम्। एवमेव अनन्यया भक्त्या प्रह्लादः भगवत्सान्निध्यं लेभे।